Postal Regd.No. GAMC- 1553/2022-2024 ISSN 2454-6313

संस्कृत-
# साम्प्रतम्
(Sampratam means "Current")

(संस्कृतमासिकी पत्रिका)
वर्ष : १८ अङ्क : २०९
ऑक्टोबर - २०२३

EKLAVYA SANSKRIT ACADEMY

Registered under RNI No. GUJMUL/2006/17235. Published on 5th of every month. Permitted to post at Ahmedabad PSO on 7th of every month under Postal Regd.No. GAMC- 1553/2022-2024 issued by SSP Ahmedabad. Valid upto 31-12-2024. containing 8 pages ₹ 10

## चिन्तनम्

सतीशः गज्जर्

### प्रकृतिसिद्धम् इदम्

एतस्मिन् संसारे जीवन्तः सर्वे जनाः नीतिमन्तः, बुद्धिमन्तः, दृष्टिमन्तः वा भवेयुः इति अस्मदीया मानुषी अपेक्षा। परन्तु वास्तविकी स्थितिः तथा नास्ति इत्यपि कटुसत्यम् एव।

एतां दुःस्थितिम् अवलोकयन्तः साधुपुरुषाः नितरां दुःखिताः भवन्ति। केचन वा मध्येमार्गं गुणान् प्रति किञ्चित् विरक्ताः इव दृश्यन्ते। धीरपुरुषाः पदमपि न प्रविचलन्ति इति सान्त्वयन्तः कवयः अपि क्वचित् विषण्णतां गच्छन्ति।

तथापि सज्जनैः चिन्तनीयं यत् संसारे सर्वे जनाः विचारपूर्वकम् एव वर्तेरन् इति अपेक्षा नितरां न सेवनीया। प्रत्युत, तान् प्रति सद्व्यवहारः करणीयः। सज्जनैः स्वकीयं सत्यं मलीमसं न कर्तव्यम्।

क्वचित् उत्तमानां समाजसेवकानाम् अपि समाजे निन्दा श्रूयते। उत्तमस्य कर्मणः निन्दनम् अज्ञस्य समाजस्य प्राथमिकं कार्यं वर्तते। अनेन समाजेन मीरा, नरसिंहः महेता, तुकारामः इत्यादयः भक्ताः अपि निन्दिताः। ते श्रेष्ठं कर्म त्यक्तवन्तः किम्?

श्रेष्ठस्य कार्यस्य विस्मरणम् इत्यपि समाजस्य स्वभावः वर्तते। समाजः बहूनि सत्कर्माणि विस्मृतवान्, विस्मरिष्यति च। तत्र ग्लानिः मा भूत्। अस्माकं देशाय नैके स्वातन्त्र्यसेनान्यः रक्तं समर्पितवन्तः। करुणापराः देशवासिनः तेषां प्रतिवर्षं द्विवारं स्मरणं कुर्वन्ति। तस्मिन् स्मरणे अपि भावस्य मात्रा कियती वर्तते इति वक्तुम् आवश्यकता नास्ति। कोऽपि सत्यपराक्रमः पुरुषः कीर्तिस्तम्भान् रोपयितुं लोककल्याणाय नैव प्रवर्तते।

सत्यश्रितानां मनुष्याणां विचाराः दीर्घजीविनः भवन्ति। तान् विचारान् सामान्याः जनाः अवगन्तुं न प्रभवन्ति। ततः विरोधः जायते। तथापि सत्यं सम्यक् दृष्टवद्भिः सज्जनैः स्वमार्गः न त्यक्तव्यः। कण्टकाः स्वधर्मे तिष्ठन्तु।

## कृष्णपक्षिण: शापविमोचनम्

मालविकपुरनामके राज्ये स्थिते अभयारण्ये किञ्चन मनोहरं कुटीरम् अस्ति। पौत्र्या चन्द्रहासिन्या सह वीरभद्रनामकः कश्चन वृद्धः तत्र निवसति। चन्द्रहासिनी षोडशवर्षीया। बाल्यात् आरभ्य सा पितामहेन सह तत्रैव निवसति। अरण्यप्रदेशस्य समग्रः परिचयः तस्याः अस्ति। अरण्ये स्थितैः प्राणिभिः सह स्नेहेन व्यवहरति सा। चन्द्रहासिनी पितामहे विशेषतः स्निह्यति। कदाचित् वार्तालापावसरे सा पितामहं पृष्टवती – ‘‘आवाम् एतस्मिन् अरण्ये किमर्थं निवसावः ?’’ इति।

‘‘वत्से ! अहं पूर्वं मालविकपुरराज्यस्य राज्ञः धीरसिंहस्य सारथिः आसम्। कदाचित् प्रतिवेशिराजः चित्रवर्णः हठात् आक्रमणं कृतवान्। चित्रवर्ण–धीरसिंहयोः महत् युद्धं प्रवृत्तम्। युद्धे चित्रवर्णेन क्षिप्तेन भल्लेन अस्माकं महाराजः व्रणितः। यद्यपि युद्धे महाराजस्य एव जयः जातः, तथापि सारथेः मम अनवधानात् एव व्रणः अभवत् इति चिन्तयन् राजा मां नगरात् निष्कासितवान्। भवत्याः मातापितरौ बाल्ये एव दिवं गतौ खलु ? अतः ततः आरभ्य अहं भवत्या सह अत्रैव अरण्ये निवसामि’’ इति विवृतवान् वीरभद्रः।

एकदा चन्द्रहासिनी स्वस्य कुटीरस्य पुरतः प्रेङ्खायाम् उपविश्य क्रीडन्ती कञ्चित् कृष्णपक्षिणं दृष्टवती। चन्द्रहासिनी तस्य समीपं गत्वा हस्तेन तम् उन्नीतवती। तदा तया ज्ञातं यत् तस्य पक्षस्य अधः व्रणः जातः अस्ति इति।

चन्द्रहासिनी तस्य पक्षिणः व्रणम् औषधेन लिप्त्वा आहारव्यवस्थामपि कृतवती। परेद्यवि एव तस्याः उपचारेण स्वस्थः सः पक्षी तां कृतज्ञतापूर्णया दृष्ट्या अपश्यत्।

केषुचिदेव दिनेषु पक्षिणः व्रणः सम्पूर्णतया उपशान्तः। एतदभ्यन्तरे पक्षिचन्द्रहासिन्योः स्नेहः गाढतया प्रवृद्धः आसीत्।

कदाचित् महाराजः धीरसिंहः कैश्चित् सैनिकैः सह तत् कुटीरम् आगतः। तस्मिन् समये वीरभद्रः कार्यवशात् कुटीरे नासीत्। धीरसिंहः चन्द्रहासिनीं पृष्टवान् – ‘‘वत्से ! एतम् अरण्यप्रदेशं भवती सम्यक् जानाति किम् ?’’ इति।

चन्द्रहासिन्या ऊहितं यत् एषः महाराजः एव स्यात् इति। अतः सा उक्तवती – ‘‘महाराज ! समग्रम् अरण्यप्रदेशं सम्यक् एव जानामि’’ इति।

‘‘मम कथनं विनैव भवत्या ऊहितं यत् अहं महाराजः एव इति। अहं महाराजः धीरसिंहः अस्मि। केभ्यश्चित् दिनेभ्यः पूर्वं मम ज्येष्ठः पुत्रः मृगयार्थं एतत् वनम् आगतः। तस्मिन् समये कस्यचित् वृक्षस्य अधः तपस्यतः ऋषेः शिरसि कश्चन सैनिकः मृतं कृष्णपक्षिणं स्थापितवान्। एतस्मात् कुपितः ऋषिः यदा नेत्रे उद्घाटितवान् तदा मम पुत्रः तस्य पुरतः स्थितः आसीत्। सः ऋषिः मम पुत्रम् एव अस्य अकार्यस्य कर्तारं विचिन्त्य किमपि अविचार्य स्वमन्त्रशक्त्या तं कृष्णपक्षिणं कृतवान्। सैनिकद्वारा एतां वार्तां ज्ञातवान् अहं तं पक्षिणम् अन्विष्यन् एतत् अरण्यम् आगतः’’ इति उक्तवान् राजा धीरसिंहः।

तदा चन्द्रहासिनी – ''महाराज ! तं कृष्णपक्षिणम् अहं न केवलं दृष्टवती, अपि तु व्रणितं तम् औषधोपचारेण स्वस्थं कृतवती अस्मि अपि। सः अत्रैव कुत्रापि स्यात्'' इति वदन्ती सा करताडनं कृतवती।

अपरस्मिन् एव क्षणे सः कृष्णपक्षी उड्डयनं कुर्वन् आगत्य चन्द्रहासिन्याः स्कन्धे उपविष्टः। तं दृष्ट्वा महाराजः पुत्रप्राप्त्या इव महान्तं सन्तोषम् अनुभूतवान्।

ततः चन्द्रहासिनी पृष्टवती – ''प्रभो ! अस्य राजकुमारस्य पूर्वतनरूपप्राप्त्यर्थं कः उपायः ?'' इति।

''पुत्रि ! एतमेव विषयं वक्तुम् अहम् उद्युक्तः। येन ऋषिणा शापः दत्तः सः मया दृष्टः, निवेदितः च यत् अपराधी मम पुत्रः न, अपि तु अन्यः कश्चन अहङ्कारी सैनिकः इति। तदा 'विना कारणं मया राजकुमारः दण्डितः' इति ऋषिः अनुकम्पया युक्तः सन् मन्त्रजलं मह्यं दत्त्वा उक्तवान्– 'यः विनापराधं भवता दण्डितः, सः एतेन जलेन राजकुमारं यदि प्रोक्षेत् तर्हि एषः निजरूपं प्राप्स्यति' इति'' इति उक्तवान् महाराजः।

तदा बहुधा सन्तुष्टा चन्द्रहासिनी उक्तवती – ''प्रभो, तर्हि समस्यायाः परिहारः विनायासं लब्धः इव'' इति।

राजा चन्द्रहासिन्याः वचनस्य तात्पर्यं न ज्ञातवान् एव। अतः सः पृष्टवान् – ''कथम् एतत् ?'' इति।

''महाराज ! मम पितामहः वीरभद्रः भवतः रथस्य सारथिः आसीत्। अहं तस्य पौत्री। मम नाम चन्द्रहासिनी इति। युद्धे यदा शत्रुः भल्लेन भवन्तं व्रणितं कृतवान् तदा भवान् अविमृश्य मम पितामहं नगरात् निष्कासितवान्। किन्तु मम पितामहः स्वदेशं राजानं च बहुधा इच्छति। देशविषये भवतः विषये च तस्य इतोऽपि अचला श्रद्धा वर्तते एव। विना कारणं भवता दण्डितः मम पितामहः। अतः तेनैव तत् मन्त्रजलप्रोक्षणं कारयतु'' इति उक्तवती चन्द्रहासिनी।

तदा एव बहिर्भागात् आगतः वीरभद्रः महाराजं दृष्ट्वा झटिति तं नमस्कृत्य सर्वं विषयं ज्ञात्वा तेन मन्त्रजलेन पक्षिणं प्रोक्षितवान्। तदनन्तरक्षणे एव राजकुमारः जयसिंहः स्वस्य वास्तविकं रूपं प्राप्तवान्।

महता सन्तोषेण महाराजः वीरभद्रम् उक्तवान् – ''वीरभद्र। विना कारणं भवान् नगरात् निष्कासितः इति अहं बहुधा दुःखम् अनुभवामि'' इति।

तदा वीरभद्रः सविनयम् उक्तवान् – ''प्रभो ! तदा यः दण्डः भवता मह्यं दत्तः स एव इदानीं राजकुमारस्थितिविमोचने वरः सञ्जातः ! मम इतोऽपि अधिकस्य सन्तोषस्य विषयः कः अन्यः स्यात् ?'' इति।

ततः जयसिंहः पितरम् उक्तवान् – ''यदा पक्षिरूपेण आसं तदा चन्द्रहासिनी मां महत्या प्रीत्या महता आदरेण च रक्षितवती। यदि भवतः वीरभद्रस्य च अनुज्ञा स्यात् तर्हि अहं चन्द्रहासिनीं परिणेतुम् इच्छामि'' इति।

''आदौ चन्द्रहासिनीं पृच्छतु भवान् – सा भवतः परिणयम् अङ्गीकुर्यात् उत न इति'' इति राजा हसन् पुत्रम् उक्तवान्।

चन्द्रहासिनी लज्जया शिरः अवनमय्य राजकुमारम् एव कटाक्षेण पश्यन्ती पितामहस्य पृष्ठतः गत्वा स्थितवती।

## पञ्चरात्रम् ( ग्रन्थपरिचयः )

✍ व्योम शाहः

(अनुवर्तते)

महाकविभासप्रणीते पञ्चरात्रे एतावता अस्माभिः दृष्टं यद् रूपकस्य प्रारम्भे सूत्रधारः श्रीकृष्णस्य श्लेषमयीं स्तुतिं करोति। विष्कम्भके तावत् त्रयाणां ब्राह्मणानां परस्परं वार्ता जायते। ते कथयन्ति यद् दुर्योधनेन कृतेन यज्ञेन सकलं जगत् तृप्तम्। यज्ञानन्तरं दुर्योधनोऽपि तृप्तः। सः इहैव लोके स्वर्गवद् अनुभवति।

दुर्योधनः द्रोणम् आचार्यम् अभिवादयितुम् उद्युक्तः किन्तु द्रोणः तं निवारयति। भीष्मः तावत् प्रथमं प्रणम्य इति तम् अभिवादयितुं प्रेरयति। भीष्मोऽपि गुरुं द्रोणं वन्दितुं दुर्योधनाय कथयति। ततः दुर्योधनः यथाक्रमं द्रोणं, भीष्मं, शकुनिं च अभिवादयति। ततः सर्वेऽपि क्रमशः दुर्योधनं सभाजयन्ति। तत्र सर्वेषां राज्ञां मण्डले विराटम् अपश्यन् तस्य अनागमनस्य कारणं पृच्छति दुर्योधनः। तदर्थं दूतः प्रेषितः इति शकुनिः कथयति। दुर्योधनः आचार्यं द्रोणं प्रतिनिवेदनं कुरुते – "भो आचार्य ! धर्मे धनुषि च आचार्य ! प्रतिगृह्यतां दक्षिणा।" तदा गुरुः द्रोणाचार्यः इत्थं पाण्डवैः सह संविभागं राज्यस्य कुरुत –

**"येषां गतिः क्वाऽपि निराश्रयाणां संवत्सरैः द्वादशभिः न दृष्टा।**
**त्वं पाण्डवानां कुरु संविभागम् एषा च भिक्षा मम दक्षिणा च॥"**

शकुनिः सोद्वेगम् इमां याचनां धर्मवञ्चनारूपेण कथयति। द्रोणोऽपि तथैव तं प्रतिवक्ति – "त्वदनार्यभावात् सर्वलोकम् अनार्यम् इति मन्यसे।" भीष्मः द्रोणस्य पक्षे तिष्ठन् पाण्डवानां दुर्दशां वर्णयन् तेभ्यः राज्यस्य भागं दातुं प्रेरयति। सः शकुनेः वचनस्य श्रवणाद् अपि वारयति दुर्योधनम्। महता कष्टेन दुर्योधनः अस्मिन् कार्ये नियोजितः समर्थनम् इच्छति। कस्य इति पृष्टे मातुलस्य शकुनेः अस्मिन् कार्ये समर्थनम् इच्छामि इति निगदति। दुर्योधनः चर्चार्थम् आह्वयति मातुलं शकुनिं कर्णं च। तत्पूर्वम् एव द्रोणः तम् आहूय सान्त्वयति। भीष्मः आचार्यस्य एवंविधां प्रवृत्तिं दृष्ट्वा आत्मगतं खेदम् उपस्थापयति। शकुनिः अपि जानाति यद् "गुरुः द्रोणः स्वकार्यलोभाद् एव मां सान्त्वयति" इति। ततः कर्ण–शकुनि–दुर्योधनानां परस्परं संलापः भवति। शकुनेः मतं तु निश्चितं यद् राज्यं न दातव्यमिति। पुनश्च दुर्योधनः दातव्यमिति निश्चये स्थितः। पुनरपि सः कर्णम् आपृच्छतं स कथयति यत् क्षमादानेन राज्यदानविषये तु दुर्योधनः एव प्रमाणम्। दुर्योधनः शकुनिं किंचन अनुपजीव्यं राज्यं चिन्तयितुं प्रेरयति।

शकुनिः तु कथयति–"**शून्यम् इत्यभिधास्यामि कः पार्थाद् बलवत्तरः।**
**ऊषरेष्वपि सस्यं स्याद् यत्र राजा युधिष्ठिरः॥**"

मन्त्रणानन्तरं शकुनिः कथयति यद् यदि पञ्चसु रात्रिषु अज्ञातवासस्थितानां पाण्डवानां प्रवृत्तिः ज्ञायेत तर्हि तेभ्यः दुर्योधनः राज्यस्य अर्धं दास्यति। एतत् श्रुत्वा द्रोणः खिन्नः। अस्माद् विकल्पात् तु वरस्य न दानम् एव योग्यम् इति अचिन्तयत्। कारणं तु –

**"ये कर्तुकामैच्छलनं भवद्भिः संवत्सरैर्द्वादशभिर्न दृष्टाः।**
**ते पञ्चरात्रेण मयोपनेया वरं ह्यदत्तं विशदाक्षरेण॥"**

**(क्रमशः...)**

## मासवार्ता:

### विदेशीयानां छात्राणां कृते आरब्धौ बालसंस्कृतवर्गौ

संस्कृतं पठितुम् इच्छुकानां विदेशीयच्छात्राणां कृते एकलव्य-संस्कृत-एकेडेमीसंस्थानेन Online संस्कृतवर्गा: आरब्धा: सन्ति । आयोजनेऽस्मिन् बालकानां कृते "Value Education through Sanskrit" बालसंस्कृतवर्गौ आरब्धौ वर्तेते । अभ्यासक्रमेऽस्मिन् १ कक्ष्यात: ७ कक्ष्याया: बालका: आवर्षं सप्ताहे एकवारं संस्कृतभाषाया: अध्ययनं करिष्यन्ति। श्रीमती सङ्गीता मिस्त्री, श्रीमती अमी गोहेल: च छात्रेभ्य: मार्गदर्शनं दास्यत: ।

### सम्पन्न: प्रमाणपत्रवितरणकार्यक्रम:



एकलव्य-संस्कृत-एकेडेमी बालानां कृते "Value Education through Sanskrit" बालसंस्कृतवर्ग: इति अभ्यासक्रमं सञ्चालयति । अभ्यासक्रमेऽस्मिन् Skg त: आरभ्य ९ कक्ष्याया: छात्रा: आवर्षं सप्ताहे एकवारं रविवासरे संस्कृतभाषाया: अध्ययनं कुर्वन्ति। गतवर्षे ये छात्रा: संस्कृतम् अपठन् तान् प्रोत्साहयितुं सप्टेम्बरमासस्य तृतीयदिनाङ्के प्रमाणपत्रवितरणकार्यक्रम: आयोजित: आसीत् । कार्यक्रमेऽस्मिन् डॉ. उषा उपाध्यायमहोदयाया: (निदेशिका, भारतीय-भाषा-संस्कृति-संस्थानम्, गूजरातविद्यापीठ:) करकमलाभ्यां छात्रेभ्य: प्रमाणपत्रप्रदानम् अभवत्। प्रमाणपत्रं प्राप्य छात्रा: आनन्दिता: आसन्। कार्यक्रमेऽस्मिन् विविधै: कार्यक्रमै: छात्रा: स्वकीयां प्रतिभाम् अपि प्रदर्शितवन्त: ।

### आरब्ध: संस्कृतभाषाशिक्षणवर्ग:

संस्कृतं पठितुम् इच्छुकानां संस्कृतरसिकानां कृते एकलव्य-संस्कृत-एकेडेमी संस्कृतभाषाशिक्षणस्य वर्गाणां नियतम् आयोजनं करोति । एतस्मिन् उपक्रमे सप्टेम्बरमासस्य २२ दिनाङ्कत: संस्कृतभाषाशिक्षणस्य द्वितीयस्तरस्य आरम्भ: जात: वर्तते । सायम् ६.३० वादनत: ८.०० वादनपर्यन्तम् अभ्यासक्रमस्य समय: वर्तते । अभ्यासक्रमोऽयं डिसेम्बरमासस्य २२ दिनाङ्कपर्यन्तं संवर्तिष्यते।

## कृपया हसन्तु

**रमण: कोपेन दूरवाणीम् अस्थापयत् । तं दृष्ट्वा -**

**नमन: - किं जातम् ? किमर्थं कोपं करोति भवान् ?**

**रमण: - एते वित्तकोषाधिकारिण: स्वकीयं वित्तकोषं चालयितुं वित्तकोषकार्यालयं स्वयं तु भाटकेन स्वीकुर्वन्ति .... किन्तु मह्यं 'होमलोन' दातुं वारं वारं दूरवाणीं कुर्वन्ति ।**

★ ★ ★ ★ ★

**न्यायाधीश: - (आरोपिणम् उद्दिश्य) त्वम् अद्य तृतीयवारं न्यायालयं प्रति आगत: । लज्जां न अनुभवसि किम् ?**

**आरोपी - भवान् तु प्रतिदिनं न्यायालयं प्रति आगच्छति । किं भवान् लज्जाम् अनुभवति ?**

★ ★ ★ ★ ★

**रमण: - (नमनम् उद्दिश्य) यदि त्वं घर्मम् अनुभवसि तर्हि किं करोषि ।**

**नमन: - अहं कूलरयन्त्रस्य पुरत: उपविशामि ।**

**रमण: - तथापि अधिक: घर्म: भवति तर्हि ?**

**नमन: - तर्हि अहं कूलरयन्त्रं चालयामि ।**

## सुभाषितम्

**- संस्कृतविकिपीडियाजालस्थानात्**

**परस्परविरोधे तु वयं पञ्च शतं च ते ।**
**परैः परिभवे प्राप्ते वयं पञ्चोत्तरं शतम् ॥**

**तात्पर्यम्** – धर्मराजेन एवम् उच्यते – वयं पाण्डवाः पञ्च कौरवाः शतं जनाः । परस्परकलहावसरे वयं भिन्नगणीयाः । किन्तु अन्यः कोपि अस्मदुपरि आक्रमणं यदा कुर्यात् तदा पञ्चोत्तरं शतं जनाः अपि मिलित्वा एव शत्रून् सम्मुखीकुर्मः ।

**परोपदेशवेलायां शिष्टाः सर्वे भवन्ति वै ।**
**विस्मरन्तीह शिष्टत्वं स्वकार्ये समुपस्थिते ॥**

**तात्पर्यम्** – अन्येषाम् उपदेशावसरे सर्वे उत्तमाः एव भवन्ति । स्वार्थसाधनावसरे एव उत्तमतां विस्मरन्ति जनाः ।

**पल्लवतः कृपतरोरेष विशेषः करस्य ते वीर ।**
**भूषयति कर्णमेकः परस्तु कर्णं तिरस्कुरुते ॥**

**तात्पर्यम्** – कल्पतरोः पल्लवापेक्षया वीरस्य करः विशिष्टः अस्ति । कल्पतरोः पल्लवः एकं कर्णं भूषयति । वीरस्य करः कर्णसदृशमपि राजानम् अपि तिरस्करोति, अर्थात् कर्णस्य अपेक्षया अधिकं ददाति वीरः ।

## ज्ञानसरित्

श्यामः पटेलः

**समुद्रे उद्भवन् मृत्योः कूपः - आवर्त्तः !** -वृष्टिकाले मार्गे सर्वत्र जलमेव दृश्यते। जलनिर्गमनाय मार्गस्य अधः जलसारणिः अपि भवति। तस्याः मुखानि स्थाने स्थाने छिद्रमयैः आवरणैः पिहितानि भवन्ति। तैः छिद्रैः यदा वृष्टिजलं वेगेन निर्गच्छति तदा तत्र चक्राकारः आवर्त्तः भवति सः अस्माभिः दृष्टः एव स्यात्।

जलम् इव द्रववस्तुजातं यदा सङ्कीर्णद्वारं प्रति प्रवहति तदा सर्वाभ्यः दिग्भ्यः प्रबलतया आगत्य एकस्मिन् केन्द्रे पीडनं करोति। तेन तत्र चक्राकारः आवर्त्तः भवति। नदीषु तडागेषु वा कदाचित् भूरन्ध्रं भवति तदापि जलावर्त्तः दृष्टिगोचरः भवति।

चक्राकारेण प्रवहतः जलस्य गतिः शक्तिश्च प्रचण्डा भवति। समुद्रे तु बृहन्तः आवर्त्ताः उद्भवन्ति। ते तु भीषणशक्तिसम्पन्नाः भवन्ति। तेषु आवर्त्तेषु कदाचित् कापि नौका पतिता भवति तदा तस्याः मुक्तिः न सम्भवति। सा नौका निश्चयेन चक्राकारेण गतिं कुर्वती समुद्रस्य तलं प्राप्य नष्टा भवति। नौचालकाः एतान् जलावर्त्तान् मृत्योः कूपाः इव मत्वा तेभ्यः दूरे एव स्थित्वा समुद्रे विहरन्ति।

स्कोटलेण्डदेशस्य कोरिवेकनस्य सामुद्रिके अखाते विश्वस्य बृहत्तमः जलावर्त्तः अस्ति। जापानदेशस्य अवाजीद्वीपस्य समीपे अपि भयङ्करः प्रसिद्धश्च आवर्त्तः अस्ति। सः नारूटो आवर्त्तः इति नाम्ना ख्यातः अस्ति। तस्मिन् १८ किलोमीटरमितेन वेगेन जलं चक्राकारां गतिं करोति। आवर्त्तः अयं ६६ फीटमिते विस्तारे प्रसृतः वर्तते।

आवर्त्तः – whirlpool, भूरन्ध्रम् – गर्तः– ditch, जलसारणिः – gutter

## शब्दमञ्जूषा

| | | |
|---|---|---|
| **दूनः** | संतप्त | pained |
| **दृब्धः** | बांधा हुआ | tied |
| **दृकम्** | छिद्र | hole |
| **मण्डली** | सर्प | snake |
| **नूत्नम्** | नया | new |
| **क्रमेलकः** | ऊंट | camel |
| **उष्णीषः** | मुकुट | crown |
| **उमः** | नगर | town |
| **सृकः** | वायुः | air |
| **स्त्रोतस्विनी** | नदी | river |
| **संवत्सरः** | वर्ष | year |
| **इन्दूरः** | मूषक | rat |
| **इरावान्** | समुद्र | ocean |
| **इरा** | भूमि | earth |
| **इन्दीवरम्** | नील-कमल | blue lotus |

## किं भवन्तः जानन्ति ?

**१ ) कलिङ्गयुद्धानन्तरम् अशोकः कं धर्मम् अन्वसरत् ?**

(क) बौद्ध (ख) पारसी (ग) जैन (घ) यहूदी

**२ ) एतेषु कः स्वामिविवेकानन्दस्य गुरुः आसीत् ?**

(क) रामानन्दः (ख) रामकृष्णपरमहंसः (ग) रामतीर्थः (घ) रामदासः

**३ ) बेलूरमठस्य सम्बन्धः एतेषु केन सह आसीत् ?**

(क) स्वामिदयानन्देन (ख) अरविन्देन (ग) विवेकानन्देन (घ) रामदासेन

**४ ) महाराणाप्रतापस्य वंशः कः आसीत् ?**

(क) परमारवंशः (ख) चौहाणवंशः (ग) कछवाहावंशः (घ) सिसौदियावंशः

**५ ) एतेषु कस्य ऋषेः नाम 'कलहप्रियः' इति आसीत् ?**

(क) परशुरामस्य (ख) नारदस्य (ग) दुर्वाससः (घ) पराशरस्य

**६ ) एतेषु कः सिखगुरुः स्वर्णमन्दिरम् अस्थापयत् ?**

(क) गुरुहरिरायः (ख) गुरुः अर्जुनदेवः (ग) गुरुगोविन्दसिंहः (घ) गुरुरामदासः

**७ ) गुरुगोविन्दसिंहस्य जन्म कुत्र अभवत् ?**

(क) पटनायाम् (ख) अमृतसरे (ग) पटियालायाम् (घ) देहल्याम्

उत्तराणि – (१) क (२) ख (३) ग (४) घ (५) ख (६) घ (७) क

# अस्माकम् आगामिकार्यक्रमाः

EKLAVYA SANSKRIT ACADEMY

## दीपावलीवर्गः

**(17 Nov 2023 to 25 Nov 2023)**

## संस्कृतव्याकरणम्

(Class 9-10)
8am to 9:30am
3000/-

## बालसंस्कृतवर्गः

(Class 1 to 8)
10am to 11:30am
2500/-

**contact: Dr Mihir Upadhyay, 98246 16237**

EKLAVYA SANSKRIT ACADEMY

**Online / Offline**

**Admission Open**

## संस्कृतभाषाशिक्षणम्

### First Level

**Date :** 03/01/24 to 29/03/23
**Day :** Mon-Wed-Fri
**Time :** 7:00am to 8:30am
**Fees :** 6000/-

### Third Level

**Date :** 03/01/24 to 29/03/24
**Day :** Mon-Wed-Fri
**Time :** 6:30pm to 8:00pm
**Fees :** 6000/-

## संस्कृत-साम्प्रतम्

नमस्कारः
यदि भवन्तः "साम्प्रतम्" मासिकीपत्रिकायाः ग्राहकाः भवितुम् इच्छन्ति तर्हि अधोलिखिते सङ्केते धनं प्रेषयन्तु ।

**ग्राहक शुल्कम्**

वार्षिकं रू - 100
द्वैवार्षिकं रू - 175
त्रैवार्षिकं रू - 250
अङ्कमूल्यं रू - 10

## स्तोत्रपाठः

**( मातृपूजनम्, शक्रादयस्तुतिः च )**

**Date :** 03/10/2023 to 31/10/2023
**Day :** Tuesday - Thursday
**Time :** 06:30 pm to 8:00 pm
**Fees :** Rs. 2500/-

**contact: Dr Mihir Upadhyay, 98246 16237**

**प्रियवाचकाः**
- **भवतां समीपे यदि पत्रिकायां प्रकाशनयोग्याः लेखाः, कथाः, हास्यकणिकाः वा सन्ति तर्हि कृपया प्रेषयन्तु ।**
- **पत्रिकायाः विषये सूचनम् अपि स्वीकार्यम् अस्ति ।**

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

**Published, Printed and Edited by Dr. Mihir Upadhyay**
For. Eklavya Sanskrit Academy
Core House, Off CG Road
Ahmedabad 380 006 India
**Fax:** (91) 79 26563681
**Mobile:** (91) 98246 16237
**e-mail:** mihiresa@gmail.com
**web:** www.eklavyasanskritacademy.org

Printed at :- Print Vision Private Limited, Print Vision House, Jay Gujarat Fruit Lane, Ambawadi Market, Ahmedabad, Gujarat 380006